॥ श्रीरस्तु ॥

नवसालपुराभिजनस्य,

राधाकृष्णशास्त्रिणः.

कृतिषु.

॥ नीतिमार्गप्रदीपिका ॥

विजयताम् ॥

NO. X.

THE

NEETHIMARGAPRADIPIKA.

NEETHINERI VILAKKAM,

OF

KUMARAGURUPARADASIKAR.

Translated From Tamil Into Sanskrit.

BY

RADHAKRISHNA SASTRIAR,

OF

PUDUKOTA.

Printed at the "Sri Vidya Press" Kumbakonam.

1894.

All Rights Reserved.

॥ श्रीरस्तु ॥

॥ शिवाभ्यां नमः ॥

अथ

॥ नीतिमार्गप्रदीपिका ॥

1 नन्वास्माकाः! सलिलविलसद्बुद्बुदाभं युवत्वं
पूर्णाऽपि श्रीर्जलपरिसरल्लोलकल्लोलतुल्या
देहश्चांभोलिपिरिव भृशं नश्वरस्तत्कुतो वा
भक्त्यास्माभिस्सपदि न हृदोपास्यते चित्सभेशः
2 धर्मं चार्थं वितरति तथा काममोक्षौ च विद्या
कीर्तिं शुद्धां द्रढयति पुरस्सर्वलोकप्रकाशाम्
भाव्ये चाधौ सति तु दिशति प्रौढहस्तावलम्बं
तस्माद्युक्ता गतिरिह नृणां नास्ति विद्यातिरिक्ता
3 आदौ कष्टाप्यथ सुखततिं दोग्धि विद्या समग्रा
मौढ्यं हत्वा विकचयति च ज्ञानमत्यन्तशुद्धम्
आदौ दत्ते सुखमतिमितं कामभोगस्तु नृणां
पश्चात्तस्मादपि शतगुणं दुःखमेव प्रसूते

---

१. न हृदोपास्यत इत्यत्र = न विद्वांसं चेष्टाऽवति सुतकलत्रादिरचितेत्यादिवत् स्वरसन्ध्याप्तसौन्दर्यो यतिविशेषः । अतोऽत्र न यतिभङ्गशङ्का कार्या, एवमग्रेऽपि तत्रतत्रोह्यम् ॥

4 विद्यारूपा सकलविदुषामस्ति भार्या सुशीला
पद्यग्रन्थः परमरुचिरश्चास्ति तस्यास्तनूजः
गद्यस्तोमात्मकमुदयते भाण्डजातं[1] च तेषां
श्लाघ्या भूषा सदसि विभयत्वं तु कस्यापि[2] सूरेः
5 गुर्वी विद्याऽप्यवसरपरिज्ञानहीना न विद्या
को वाऽर्थः स्यादसति तु पुनर्विद्ययाऽप्युक्तिदाक्ष्ये
वाग्मित्वं चेद्भवति विदुषां सूरिसम्मोदहेतुः
सौरभ्यं तत् कनककुसुमस्येव सर्वाभिनन्द्यम्
6 या विद्या स्यात् सदसि भयतः कम्पिनां पण्डितानां
वाचालत्वं यदपि बहुधा निर्भियां बालिशानाम्
वित्ते ज्ञात्वाऽप्यघमचरतां[3] त्यागभोगौ च योऽर्थः
निस्स्वानां या महततिरनुत्पत्तिरेषां[4] वरं हि
7 धाता वक्त्राम्बुरुहविलसद्भारतीहंसिकोऽपि
प्राग्भिश्शस्तैस्सह सुकविभिर्नोपमीयेत जातु
नश्यन्त्येते न हि कविकृताः कीर्तिमन्तः प्रबन्धाः
नश्यन्त्येव द्रुहिणरचिताः सर्व एते पदार्थाः

---

१. भाण्डजातं = गृहोपस्करनिवहः ॥
२. कस्यापीति = सभानिर्भयत्वरूपं भूषणं कस्यचिदेव विदुषोऽस्ति, न तु सकलविदुषामपीत्यर्थः ॥
३. अघं = प्रतिग्रहादिप्रयुक्तं पापम् ॥
४. महततिः = द्रव्यव्ययैकसाध्या उत्सवपरंपरा ॥

8 विद्याऽभ्यस्ता बहुदिनगणैर्नस्फुरन्ती सभायां
लज्जाहेतुर्भृशमपजयात् स्वाश्रयस्यैव या स्यात्
सा मध्याह्ने स्वधुरि परसंसर्गवत्स्वाङ्गनातोऽ-
प्यत्यन्तार्तिं दिशति, सहसा यन्न शक्या[1] विहातुम्

9 कृच्छ्राभ्यस्तां प्रथममदृढीकृत्य विद्यां स्वमत्या
बद्ध्वायासैः पुनरपि महानन्यविद्याप्रयत्नः
हस्तप्राप्तं बहु बहिरवाकीर्य वित्तं प्रमोहात्
उञ्छैर्भूयः प्रचुरधनसंपादनायत्नतुल्यः

10 पत्नी गुण्या[2] सुचरितवती गेहधर्माहवृत्तिः
न स्याच्चेत्, तत्पतिपरिगृहीतो न भात्येव धर्मः
नो चेत् सम्पत्सकलमनुजावर्जने[3] हेतुभूता
विद्याऽनन्ताऽप्यहह विदुषां नैव शोभेत किञ्चित्

11 नम्रोऽत्यर्थं मधुरवचनोऽप्यर्थहीनो जनश्चेत्
लोकोऽयं तं प्रति कटु वचो भाषते, नैव सौम्यम्
सम्पन्नश्चेत् कठिनवचनोऽप्युद्धतोऽपि स्वभावात्
तत्पादौ संश्रयति, विगुणो ह्येष लोको न गुण्यः

---

१. न शक्येति = अङ्गना सहसा त्यक्तुं शक्या, विद्या तु न तथा। अतस्तादृशाङ्गनातोऽपि सा विद्याऽत्यन्तार्तिंदेत्यर्थः॥

२. गुण्या = प्रशस्तगुणवती ॥

३. आवर्जनं = वशीकरणम् ॥

12 सर्वो बुध्वाऽपि च धनवतां लुब्धतामात्मदैन्यं
तेभ्यः प्रोच्यार्दयति[1], तनुते हीनकर्मापि तेषाम्
पूर्वात् पुण्यादधिगतधनं भाग्यहीनोऽनुजीव-
त्येषा लोकप्रकृतिरिति तन्मन्महे नाज्ञतेति[2]
13 विद्यैवालङ्करणनिचयो वेदितॄणां मनोज्ञः
नैवापेक्ष्यस्तदितर[3] इह द्राग्विनाशी जडश्च
न प्रार्थ्यन्ते[4] मणिगणचितैर्भूषणैर्भूषणानि
स्वालङ्कृत्यै[5], क इव तनुयाच्चारुतां चारुतायाः
14 सर्वज्ञः को भवति जगति श्रीबृहत्कर्णभूपे!
तस्माद्विज्ञो वयमतितरामित्यहन्तां न कुर्यात्
टङ्केनोर्वीभृदपि तनुना भिद्यतेऽहो महीयान्[6]
भेद्यो नासावपि बृहदयस्कारकूटव्रजेन

---

१. अर्दयति = याचते ॥
२. तत् = धनहीनानां धनिकानुजीवनं ॥
३. तदितर इति अलङ्करणनिचय इत्यनुषज्यते ॥
४. न प्रार्थ्यन्त इति यथा भूषणैः स्वालङ्काराय भूषणान्तराणि नापेक्ष्यन्ते, यथावा सौन्दर्येण स्वस्य किमपि सौन्दर्यं नापेक्ष्यते, तथा विद्यावद्भिरपि नालङ्कारोऽपेक्ष्यत इत्यर्थः ॥
५. इवशब्दो वाक्यालङ्कारे ॥
६. महाप्राज्ञैरप्यजय्यो विद्वान् कदाचित् किञ्चिज्ज्ञेनापि जय्यो भवेदित्येतत् अप्रस्तुतप्रशंसया प्रतिपादयति टङ्केनेति ॥

15 दृष्ट्वा स्वस्मादपि मितधनान् हन्त संपन्मदीया
भूयिष्ठेति प्रमदममितं प्राप्नुयाच्छेमुषीमान्
स्वस्माद्विद्याधिकमभिसमालोक्य सर्वा ममैषा
विद्याऽप्येतद्धुरि तु कियतीत्यन्तरङ्गे व्यथेत
16 विद्यावित्तद्वयविरहिता अत्मदैन्यं ब्रुवाणाः
कांक्षन्तश्च स्वधुरि[1] विनयोद्रेकभाजो यथा स्युः
एवं विद्याद्रविणसहिताश्चेद्धिनीताः प्रकृत्या
तेषां विद्यां धनमपि बुधास्संपदित्यामनन्ति
17 मर्यादाऽतिक्रमणमभिसंवीक्ष्य नीचैः प्रणीतं
विद्यावन्तस्सपदि सुतरामेव नम्रीभवन्ति
वस्तूद्गच्छत्यतिलघुतमं चेत् तुलाया धटा[2]स्थं
नम्रीभावं प्रभजतितमां द्राग्गरिष्ठं स्वयं हि
18 प्राज्ञैष्माहो विषय[3]विमतान् साधुवृत्ते वसाम-
श्चेति स्वा[4]न्ते यदि निजमहत्ता[5]ं स्वयं मानयेयुः
तेषां हेयान्यपि विजहतां कुर्वतां वा विधेया-
न्यत्यासक्त्या सुकृतमखिलं निष्फ[6]लं पर्यवस्येत्

---

१. स्वधुरि = विद्याद्रविणसहितानां स्वेषां पुरतः ॥
२. धटा = तुलाया अधोलंबिपात्रम् ॥
३. विषयान् शब्दादीनेव विमतान् शत्रून्॥ ४.स्वान्ते चित्ते
५. महत्तामित्यत्र नामाभेदयतिः एवमुत्तरत्रापि ॥
६. निष्फलमिति स्वोत्कर्षैकमानिनः सुकृतफलमेव न सिध्यतीत्यर्थः ॥

19 स्वस्याशेषैरपि बहुमतिं वाञ्छतः स्वप्रशंसा
दीपोद्योतीकृतिरिव जलैर्दीपपात्रोपनीतैः
मान्यंमन्यत्वविरह इहाख्यायते मान्यतेति
प्रेक्षावद्भिः, सुखमिति सुखप्रार्थनाभाव एव
20 अन्यैः स्वस्याधिकबहुमतिं लिप्समानस्य सम्यक्
स्वानुष्ठेयं किमपि च सदास्त्येव हित्वा प्रमादम्
यत्त्वन्येषां गुणगणसमुद्घोषणं यच्च तेषां
दोषाणामप्रकटनमथो भाषणं यद्विनीतम्
21 धर्मान् ज्ञात्वा स्वयमचरतस्सूपदेष्टुः परेभ्यः
शुद्धिः काचिद्विफलवचसामस्त्यवश्यं विधेया
व्याहर्ता त्वं न भवसि कुतो धर्मवर्तीति कश्चित्
लज्जां यच्छन् न वदति यथा, संविमर्शस्तथा यः
22 शास्त्रीयार्थान् श्रमपरिचितान् स्वेतरेषां फलार्थं
विक्रीणानैः किमपि च फलं भोग्यमेवास्त्यवश्यम्
नानाभेदा अपि रचयितुर्यातना निर्दयस्या-
जस्रं मृत्योरतिबलवतो यत्किलाज्ञावशत्वम्

---

१. सुखमिति = सुखप्रार्थनाऽभाव एव सुखमिति प्रेक्षावद्भि-
राख्यायत इत्यर्थः ॥

२. सूपदेष्टुः = सुष्ठूपदेशकर्तुः ॥

३. य इति तथा यस्संविमर्शः, स एव विफलवचसां विधेया
शुद्धिरित्यर्थः ॥

23 विद्याहेतुप्रबलसुकृतैर्वञ्चितानामशुद्ध-[1]
स्वव्याहारप्रकटनमतिप्रौढविद्वत्सभायाम्
[2]चञ्चाकारादिव खगमृगा यूयमेते सदस्याः
मा भैष्टास्मत्पृथुतरतनोरित्यभीतिप्रदानम्

24 विद्याऽवद्यैर्ननु विरहिता लभ्यते शुद्धमेधै-
रेवाश्रान्तं न हसनपरैरत्र मूढाग्रणीभिः
लक्ष्मीदेव्या अपि पुरुषतारागहेतु[3]प्रभस्य
स्त्रीरत्नस्याप्यनुभवसुखं नैव लभ्येत षण्डैः

25 विद्यां मूढश्रवणयुगळे संप्रवेश्याथ तेभ्योऽ-
वज्ञालाभो य इह विदुषां केवलं दोष एषः
धीमन्तस्ते गुरुतरमविज्ञाय मौढ्यं तदीयं
विद्योत्कर्षं निजमविदुषस्तान् कथं दूषयन्तु

26 प्राज्ञा भूभृत्सदनमसकृन्नादरेण श्रयन्ते
प्रायः पूजां दधति च, न तत्सेवनेनापि मूढाः
नो मार्जारो नरपतिमहान्तःपुरस्थोऽपि मान्यः
मान्यो हस्ती नृपगृहबहिर्द्वारबद्धोऽपि लोकैः

---

१. वञ्चितानां = रहितानाम् ॥
२. चञ्चा = सस्यक्षेत्रेषु खगमृगाणां भयोत्पादनार्थं निबद्धः तृणमयः पुरुषः ॥
३. प्रभस्येति = श्रियोऽपि पुम्भावकामनाजनकलावण्यातिशयस्येत्यर्थः ॥

27 पातिव्रत्यप्रवणमनसां योषितामात्मभर्ता
देवः साक्षादपिच पितरावेव देवौ सुतानाम्
देवो नृणां गुरुरिह महाधर्मनिष्ठापराणां
देवो राजा कनकमणिभिर्मण्डिताङ्गोऽखिलानाम्

28 दृष्ट्वैवाज्ञां ददति सकलं श्रोत्रतो वीक्षमाणे
राज्ये प्राप्तेऽपि च सति पुराजन्मपुण्यैकलभ्ये
प्रेम्णा लोकान् स्वयमनवतां तेन किं पार्थिवानां
शस्त्रेण स्यात् किमु विजयदेनापि निष्पौरुषाणाम्

29 गृह्णानानां सकलमनुजान् पीडयित्वा करं[1] स्वं
राज्ञां क्षीरग्रहणमपि गोर्युक्तमूधो निकृत्य
संरक्ष्यैव प्रकृतिनिकरं[2] न्यायतो गृह्णतां स्वं
प्रायेणैक्षिष्महि[3] ननु वसून्योघसंख्यातिगानि[4]

30 अद्य ग्राह्यं द्रविणमसहो यः परेद्युर्ग्रहीतुं
स्थित्वाऽध्यक्षे[5] गदितुमनसां दीनतामप्यदृश्यः

---

१. करं – राजग्राह्यं द्रव्यम् ॥
२. प्रकृतयो = जनाः ॥
३. ऐक्षिष्महीत्यत्रशोभांपुष्यत्यधिकमितिवत् धात्वभेदयतिः ।
४. ओघ इति = काचन सङ्ख्या ॥
५. अध्यक्षे = प्रत्यक्षे ॥

गत्वाप्यग्रे स्वमभिलषितं जल्पतां दन्तघर्षैः
त्रासं तन्वन् नरपतिरहो नाध्वचोरो न भूपः
31 धार्या माला दधदपि तनूमङ्गरागैर्विलिंपन्
बिभ्रद्वस्त्राण्यपि सुरुचिराण्याहरन् भोज्यपिण्डम्
गाढं प्रोक्तं हितमपि बलात्प्राप्य शश्वन्न शृण्वन्
नेत्रोन्मेषानपि नरचयन् राँट् श्वसन् प्रेत एव
32 चारैस्तथ्यं न हि खलु परिज्ञायतेऽहं रहस्थो
जानीयेति स्वकभुजसखोऽभ्येत्य बुध्वाऽपि दोषम्
नृणां दोषाः सुदुरधिगमा इत्यलं यद्भिभीयात्
निश्चेतुं राट्, स हि नृपनयो, नाश्रुतिर्दीनवाचाम्
33 किंकिं ब्रूयुर्न हि सिततमं वायसं निर्णयन्तः
मातुर्हत्यामपि समुचितां स्युर्वदन्तोऽपि केचित्
तस्मात्तत्तद्भवति च जने भ्रान्तिवर्जं यथार्थं
यद्गृह्णीते नरपतिरिदं ह्यस्य बोधाधिकत्वम्

---

१. नाध्वचोर इति = अध्ववर्तित्वाभावादिति भावः
२. नभूप इति = जनरञ्जनाभावादिति भावः ॥
३. राट् = राजा ॥
४. दीनानां नाहमपराधी विचार्य मां दण्डयेत्यादि क्रन्दतां जनानाम् ॥
५. तत्तत् = परेषु दोषारोपकं वाक्यजालम् ॥

34 दावेऽप्युग्रे ज्वलति समहोच्छ्वासमेवाचलन्तः
स्थानान्नैजादजगरचयाः सुस्वपन्त्यप्रबुद्धाः
एवं कष्टेष्वपि निजदृशोर्गोचरेष्वाधिदेषु
द्राक् बुध्यन्ते किमु जडधियो, नैव जानन्ति हन्त
35 मित्रद्वेषो रिपुसमुदये प्रेम चारेष्ववज्ञा
सन्देहित्वं परिसरगतेष्वात्मनश्चाखिलेषु
न्यक्कारश्चोत्तमजनगिरां व्यत्ययो[1] वा गुणानां
चिह्नान्येतान्यचिरजनुषामापदां भूपतीनाम्
36 स्वेनार्च्येषु स्वभवनबहिर्द्वारमासेदिवत्सु
प्रत्युत्थानाद्यलसमनसां श्रीमदोत्थाविनीत्या
लक्ष्मीभोगे निजकरगते चापि राज्ञामदूरा
लक्ष्मीज्येष्ठाघनतमकुचद्वन्द्वभोगोपलब्धिः
37 सौम्यालोकप्रचुरकलिकाः स्मेरवक्त्रप्रसूनाः
सत्यश्लक्ष्ण[2]स्ववचनशलाद्वत्तमैश्शोभमानाः
शश्वद्दानात्मकफलगणाः श्रेय उत्पादिनो ये
दातारः स्युस्तइह धरणौ भूरिदाः कल्पवृक्षाः
38 ग्रासाद्भ्रष्टेष्वतिमितकणेष्वात्मना ग्रस्यमानात्
हस्यामीलन् प्रकृतितरल[3]लो नैव खिद्येत जातु

---

१. व्यत्ययः = अन्यथाभावः ॥
२. श्लक्ष्णं = मृदुलम् ॥
३. तरलः = चञ्चलदेहः ॥

ಪೆಪ್ಪುಮೆ ಸಂಖ್ಯೆ.....

तत्रत्यास्तु स्वजननिवहैर्मातरः[2] कोटिशस्ता-
नादायैतान् कतिपयकणान् साधु जीवन्ति भुक्त्वा
39 अस्राढ्यस्य द्विरदजयिनः क्षात्रवृत्तेश्च राज्ञः
व्योम्नोऽप्यल्पीकृति[3]पटुमहास्वर्णराश्यर्पणाच्च
मृद्यादृष्ट्योल्लिखित[4]महितप्रेमभारात् प्रफुल्लात्
वक्त्रात्प्राप्तो वहति परमत्वं बहूत्कार[5] एव
40 एतं देहं पललकलितं नश्वरं निर्णयन्तः
कीर्तिं देहं परिकलयितुं श्रद्दधाना महान्तः
खेदे स्वल्पेऽपि च भवति सत्याश्रितानां जनानां
निश्चित्यान्यत् फलमपफलां स्वां तनुं न ह्यवन्ति[6]
41 हित्वा मानं स्वमथ महितत्वं च तर्ह्येष लोकः
स्वस्य प्राणान् परममधुरान् रक्षतु प्रेमभारात्
पश्चात् स्वस्य क्षणमपि भवेच्चेद्विलम्बस्तु मृत्योः
स्वप्राणानामविरतकृतेनापि संरक्षणेन

---

१. स्वजननिवहैः=बन्धुगणैः ॥ २. मातरः=पिपीलिकाः॥
३. अल्पीकृतीति = व्योमापि यथाऽल्पं स्यात्तथा महान् स्वर्णराशिरित्यतिशयोक्तिः ॥
४. उल्लिखितं = प्रकाशितम् ॥
५. बहूत्कारः = श्लाघा ॥ तथा च पूर्वोक्तैर्विशेषणैः प्रकटितमहत्त्वस्य राज्ञः प्रीतिप्रफुल्लेन मुखेन श्लाघैव स्वर्णराश्यर्पणादपि महतीत्यर्थः ॥ ६. नह्यवन्तीति=स्वशरीरत्यागेनापि स्वाश्रितान् खेदाद्रक्षन्तीत्यर्थः ॥

42 वध्वस्साध्व्यश्शुचिकुलभवा नष्टमाङ्गल्यसूत्राः
ज्ञातारश्चेन्द्रियविजयिनस्त्यक्तमिथ्याप्रपञ्चाः
हिंसाशीलास्समरसमदा युद्धवीराश्च मृत्योः
अत्यासन्नादपि न बिभियुर्घोरपुष्पावतंसात्

43 ईमैः[1] पक्वैः कृमिकुलचितैर्योजनाक्रामिभूयो[2]-
दुर्गन्धे च स्ववपुषि मृतिं प्रेक्ष्य मूढा व्यथन्ते
प्राज्ञाः पुण्यं निजतनुफलं प्राप्तवन्तः कृतार्थाः
नो खिद्यन्ते किल तनुमिमां भारभूतां विहातुम्

44 ओघाधीनप्लवनमुडुपं किं प्रतीपं प्रयायात्
एवं राज्ञो वशमनुगता भिन्नभिन्नप्रवृत्तेः
लोकाः कस्यापिच सति नृपे दूषके दूषयित्वा
तस्यैवास्मिन् पुनरपि तथा स्तावके तु स्तुवन्ति

45 गत्वा शश्वत् स्वयमिह हठाच्छ्रोत्रसंप्लोषणैर्वा
वाक्यैराज्ञः परमसचिवाः बुद्धिमुद्बोधयन्तः
तस्य क्रोधात् स्वयमतिभयाद्बोधनं न त्यजन्ति
यन्तारः किं मदकरिवशं प्राप्नुयुः प्राप्तशिक्षाः

46 नृणां क्ष्माभृत् सकृदभिमुखोऽप्यात्मविज्ञापनायै
प्रायेणायं न खलु सुगमोऽसौम्यदृक् स्यात् सकोपः

---

१. ईमैः = व्रणैः ॥
२. भूयोदुर्गन्धे = बहुतरदुर्गन्धे ॥

तस्मादस्मत्परिचित इति स्वान्यभीष्टानि धीमान्
अज्ञात्वैवावसरमुचितं नार्थयेतावनीपम्

47 प्रत्तां मैत्रीं स्मरति न च, नो मन्यते बान्धवत्वं
क्रोधे स्फीते मनसि कुरुते नैकमत्यं च भूपः
राज्यैश्वर्यप्रणिहतहृदः स्नेहवत्ता किमास्ते
नैय्यत्येन प्रणयविषयः कोऽपि नास्तीह राज्ञः

48 राजद्वारे चिरविरचितेनापि मत्सेवनेन
प्राप्तं किं वा फलमिति कृती राजसेवां न निन्देत्
सेवा सर्वा चिरविरचिताप्यन्ततः स्वस्य सार्था
भूत्वा भूभृत्सदसि महतीं मान्यतां दोग्धि यस्मात्

49 भव्यान् यत्नान् प्रथममकृतार्थानपि प्राज्ञ आन्तं
कुर्यात्, यत्नाः कतिचनकृता अन्ततस्सत्फलाः स्युः
आस्ये जन्तोरवगतभृशासन्नमृत्योरपि द्राक्
आयुर्वृध्यौषधवितरणे दोषलेशोऽपि नास्ति

---

१. ऐश्वर्यं = नियन्तृत्वम् ॥
२. चिरविरचितेनापीत्यत्र "स्पर्शाक्लिन्नामयामितनखेनास-कृत्सारयन्ती" त्यादिवत् नामाभेदयतिः ॥
३. मत्सेवनेन = मत्कर्तृकेन सेवनेन ॥
४. सद्यत्नानां फलासिध्यभावेऽपि 'यत्ने कृते यदि न सिध्यति कोऽत्रदोष' इति न्यायेन कर्तुः न कोपि दोष इत्याह आस्य इति ॥
५. आयुर्वृध्यौषधेत्यत्र 'मेघालोके भवति सुखिनोऽप्यन्य-

50 निर्यत्नस्सन् स्वयमयतनेप्यन्यथा नो फलन्ति
प्राक्कर्माणि स्वफलमिति नो बुद्धिमान् व्याहरेत
कर्मास्तित्वं मनसि कलयामीति को वा विमोहात्
मर्त्यो भूयोमरुदभिमुखं दीपमारोपयेत[1]

51 स्थेयान् यत्नो विधिबलजये शौर्यवानेव, सत्यं
मार्कण्डेयः प्रविमलतपा अत्र दृष्टान्तभूतः
विध्यङ्कूरं स्वयतनबलान्नाशयित्वा जिघांसोः
मृत्योः प्राणानहरत धिया यस्त्रिलोकप्रसिद्धम्

52 देशं बुध्वा समयमपि संशील्य हेतून् विचिन्त्य
ज्ञात्वा सम्यक् फलमपि सहायोर्जितत्वं विबुध्य
वृद्धैस्साकं तदनु च समालोच्यमालोच्य सम्यक्
पश्चाद्धीमान् प्रयतनबलैः साधयेन्मुख्यकार्यम्

53 देहश्रान्तिं न गणयति, नोमन्यते वा बुभुक्षां,
निद्रां नाप्नोति च, न मनुते चान्तरायं परोत्थम्
यातः[2] कालस्य च पुनरनावर्तनं नावधत्ते,
नो जानीते परिभवमपि स्वीयकार्यैकदृष्टिः

थाद्वृत्ति चेत' इतिवत् प्रातिपदिकभेदेऽपि स्वरसन्ध्याप्तसौन्दर्या यतिः ॥

१. भूयोमरुत् = बहुतरवायुः ॥

२. यातः = गच्छतः ॥

54 पूर्णे निम्ने सरसि महतीं भासमानां गजस्य
छायां तत्र प्लवनचपलो नाशयेद्दर्दुरोऽपि[1]
तस्माच्छत्रौ बलविरहिते चाप्युपेक्षां दधानाः
पश्चात्तस्मादुपगतमहाक्लेशमासादयेयुः
55 लोकान्[2] सर्वानपि वशयितुं पेशला एकयोक्त्या-
प्यन्तश्शत्रुं त्वसकृदृषयः काममेवातिजिग्युः
एवं भूपा रिपुगणमुपेक्ष्यापि बाह्यं प्रभूतं
शश्वद्भीता अहिभयमं[3]भिद्रावयन्ति[4] प्रयत्नात्
56 अन्तर्गूढं विषमिव बहिस्स्नेहभाजां रिपूणां
वैरं क्ष्मापस्सपदि विशदीकृत्य तान् सन्त्यजेद्वाक्
नो दाक्षिण्यं रिपुषु बिभृयात्, न व्रणं छादयेत,
छित्वा शस्त्र्या[5]पि तु समुचितैर्भेषजैर्नाशयेत

---

१. दर्दुरोऽपीति अत्यल्पोऽपि मण्डूकः अतिमहतीमपि सरस्स्थितां हस्तिच्छायां जलचालनेन नाशयति अतोऽल्पोऽपि शत्रुर्नोपेक्ष्य इत्यर्थः ॥

२. लोकानित्यादि = एकेनैव वचनेन सर्वानपि लोकान् वशीकर्तुं समर्था ऋषयोऽपि अन्तश्शत्रुं काममेव पुनःपुनस्सप्रयत्नं अत्यन्तं जितवन्तः अत । अन्तश्शत्रु-जय एवावश्यको दुष्करश्चेत्यर्थः ॥

३. अहिभयं = स्वपक्षप्रभवं भयम् ॥

४. अभिद्रावयन्ति = निवर्तयन्ति ॥

५. शस्त्र्या = सूक्ष्मेण शस्त्रेण ॥

57 स्निग्धे कुर्वन्नमितकुहनां मन्यमानोऽतदर्हान्
द्रोहान् दुर्हृच्चरितरसिको यस्तु वर्तेत मर्त्यः
तस्यायुः किं सुदृढमपि न प्राप्नुयादन्तमारात्
मृत्युस्तूष्णीं भवति समवर्त्याह्वयं किं विलोप्य
58 क्रोधः कस्मिन्नपि भवति चेदात्मनस्तत्कृतानि
प्रायः कर्माण्यतिहितकराण्यप्यपथ्यानि भान्ति
चित्तं कस्मिन्नपि भवति चेत् सुप्रसन्नं तु नैजं
चेष्टास्तस्याविरतमहिता एव पथ्या विभान्ति
59 श्रोत्रप्लोषण्यपि च सुहृदामात्मसौख्याय वाणी
दुःखायैव श्रवणमधुराप्यात्मनो दुर्हृदां सा
अत्युष्णोऽपि ज्वलदनलवत् टङ्कणो[1] रोगहारी
क्ष्वेळो रोमोद्गमदशिशिरत्वोऽपि[2] हन्त्येव जन्तून्
60 वाचा[3] क्रूरानृतपिशुनसम्बन्धहीनोक्तिहानं[4]
शश्वद्देहेन्द्रियनियमनं कृत्यतो धर्महीनात्
कामक्रोधप्रभृतिकमनः कल्मषोन्मूलनं चे-
त्येतत् प्राज्ञास्त्रितयमपि सच्छीलमित्यामनन्ति

---

१. टङ्कणः = क्षाराख्य औषधविशेषः द्राविडभाषायां वेङ्गारमित्याख्यायते ॥
२. रोमोद्गमदशिशिरत्वोऽपि = रोमाञ्चप्रदशीतलत्वोऽपि ॥
३. वाचा = वागिन्द्रियेण ॥
४. क्रूरेत्यादि = परुषायाः असत्यायाः पिशुनायाः असम्बद्धायाश्च उक्तेः वर्जनमित्यर्थः ॥

61 प्राज्ञाश्शश्वच्छ्रुतिभिरुदिते शीलमार्गे वसन्तः
नो सज्जन्ते निरवधिमहादुर्दशा अप्यघेषु
व्याघ्रोत्तंसा अपि च जठरोद्दाहकातिक्षुधार्ताः
सस्यग्रासान् न कबळयितुं कामयन्ते कदापि

62 वस्तुप्राप्तिः स्वकुलकृतवाग्विक्रयादेव या स्यात्
सम्यक् पुष्टिस्समुचिततपोविक्रयाद्या च तन्वाः
या भाण्डानां निजगृहसदां विक्रयादेव भुक्तिः
तासां त्यागः सुकुलजनुषां सर्वधर्मप्रधानम्

63 रन्ध्रं ज्ञात्वा बहुकुहनया भीषयित्वा जनेभ्यो
दीनेभ्यः स्वं समपहरतां गर्वितानां च सम्पत्
आदौ मुग्धास्तनकलशवद्वृद्धिभागप्यवश्यं
पश्चात् क्षीयेत हि झटिति तन्मध्यवत् सर्वथापि

64 लब्धं स्वल्पं बहुतममनासादितं मन्यमानाः
तृप्त्या हीना व्यपगतसुखाःसम्प्रणश्यन्ति मूढाः
क्षिप्तं क्षिप्तं सकलमपि संव्याप्य जग्ध्वाप्यतृप्तः
काष्ठव्रातं सुदृढमनलोऽप्यन्ततः किं न नश्येत्

65 नातिक्रम्य स्थितिमपि निजां वंशवत्तां च नीत्या
कुर्वन् कर्माण्यकृतवृजिनो दुर्दशायां च सत्याम्
ईहाशून्यः परधनहृतौ यस्तु वर्तेत मर्त्यः
तस्यागारेऽनिशमपि रमा सन्निधानं विदध्यात्

66 वारस्त्रीवाखिलजनमुदे श्रीर्भवत्युत्तमानां
सत्पत्नीवन्निजपतिमुदे केवलं मध्यमानाम्
पुंसः कस्याप्यनुभवपथं नोपयाता निरर्था
नाशं प्राप्नोत्यहह विधवेवाधमानां तु सम्पत्

67 सम्पन्नत्वादपि[1] वितरणेनोज्झितस्य प्रकृत्या
नैष्किञ्चन्यं वरमिह भृशं दानशौण्डस्य पुंसः
यस्माल्लोकैर्बहुभिरदयस्त्यक्तहार्दो[2] विहीनो
मृद्या दृष्ट्येत्यवितरणिवद्[3]गर्ह्यते नैव दाता

68 दुर्[4]सम्प्रापेऽपि च वितरणे पूर्वपुण्यैकलभ्ये
वाक्यैर्हृद्यैरपि विरहितत्वं नृणां दुस्सहं हि
छित्वा[5] जिह्वां परमपरुषां कीलिते वक्रयन्त्रे
कर्मारेण प्रबलतदघाख्येन ते किन्नु कुर्युः

---

१. संपन्नत्वादित्यादि = स्वभावतो दातृत्वहीनस्य पुंसः धनिकत्वादपीत्यर्थः ॥
२. हार्दं = प्रेम ॥ ३. अवितरणिवत् = लुब्धवत् ॥
४. दुस्संप्रापे = दुर्लभे ॥
५. छित्वेत्यादि = प्रबलं यत् तेषां दानप्रियोक्तिहीनानां अघं परुषोक्तिप्रयुक्तं, तेनैव कर्मारेण तेषां जिह्वां छित्वा वक्रयन्त्रे च कीलिते तेषामस्वाधीने कृते सति, ते किन्नु कुर्युः कथं वा परुषवचनानि वदेयुः, न कथमपीत्यर्थः ॥ तादृशी दुरवस्था तैर्लभ्येतैवेति भावः ॥

69 वाग्मित्वं स्वं स्वयमसफलीकृत्य तस्य प्रहाणं
सम्पद्धेतोस्सुकृतनिचयस्योज्झनान्नान्यदेव
सम्पद्यद्यप्यतिशयचलाऽथापि वाग्मित्वलभ्यं
पुण्यं कीर्तिं फलमभिलषन् नो बुधस्सन्त्यजेत्तत्[२]

70 शीलासक्तास्सुकरमपि वा पातकं नाचरन्तः
प्राज्ञोत्तंसा भृशमजहतो दुष्करं चापि पुण्यम्
यत्नात् स्वल्पादपि लघु समासादनीये महार्थे
त्यक्त्वात्यन्तं त्वरिततरतां किं विलम्बं विदध्युः

71 स्वेन[३]नासाध्यं यदिह, तदहं साधयामीति मिथ्यै-
वाङ्गीकर्तुः परहृदनुवृत्यास्ति नृणां फलं किम्
तदाक्षिण्यं परुषवचनैः प्राणिनो हृद्यथा स्या-
दित्युच्छेत्तुश्शिर इह कृपातोऽपि न न्यूनमेव

---

१. उज्झनं = त्यजनम् ॥
२. तत् = वाग्मित्वम् ॥
३. स्वेनेत्यादि = केनचिदर्थिना स्वाभीष्टे प्रार्थिते स्वेन तदसाध्यमिति ज्ञात्वापि अवश्यमहं तत् साधयामीति दाक्षिण्यवशेन मिथ्याप्रतिज्ञाकर्तुः पुंसः तत्दाक्षिण्यं निष्फलम् ॥ किञ्च परुषवचनमात्रार्हापराधकारिणि विषये परुषवचने प्रयुक्ते सति तस्य मनोव्यथा स्यात् इत्यालोच्य कृपावशेन तस्य शिरच्छेदकर्तुः प्रभोः या कृपा तत्सदृशं तदाक्षिण्यमित्यर्थः ॥

72 अल्पाः स्वल्पं किमपि विफलं कर्म कृत्वापि शश्वत्
सम्भ्रम्योच्चैः सकलविदितत्वार्थमुद्घोषयन्ति
कृत्वाप्यन्याचरितमिव[1] सत्कर्म सार्थं च तूष्णीं
तिष्ठन्त्यज्ञा इव जगति ये, दुर्लभास्ते महान्तः

73 वैराभावेऽप्यखिलमनुजावद्यवादान्[2] प्रहासा-
नप्युत्पत्तेः[3] फलमिति सदैवाचरन् दुष्टबुद्धिः
नोद्दिश्यान्यत्[4] स्वफलमितरस्यातिभीतिप्रकम्पं
द्रष्टुं तालूद्दळनकृदिवात्यन्तभीतिप्रदः[5] स्यात्

74 दुष्कृत्याय प्रयतनपरेष्वास्तिकेष्वीश्वरस्तान्
प्रादुर्भूयाकरुणमसकृद्दण्डयेन्नैवमन्यान्
भूयोभूयः परमदयितेष्वात्मजेष्वेव हार्दात्
वाचः पथ्याः परमफलदास्तातपादा ब्रुवन्ति

---

१. अन्याचरितमिव = अन्यकर्तृकमिव स्वकर्तृत्वमप्रकाश्येत्यर्थः ॥

२. वैराभावेऽपि = स्वदूष्याणां जनानां स्वस्य च विरोधाभावेऽपि ॥

३. उत्पत्तेः = स्वजन्मनः प्रयोजनमिति मत्वा ॥

४. नोद्दिश्येति = अन्यत् वैरनिर्यातनादिकमनपेक्ष्यैव कस्यचित् तालुदळने कृते सति तस्य तदा जायमानां भीतिं प्रकम्पञ्च द्रष्टुमेव तालुदळनकृत् पुरुष इव निष्कारणदूषको भयं सर्वेषां जनयतीत्यर्थः ॥

५. उद्दळनं = पीडनम् ॥

75 दुष्कृत्यानि प्रविरचयतां संपदादौ प्रवृद्धा
सौख्यापादिन्यपि न कुशला, वस्तु दुष्टं न साधु
तस्मादेषा मृदुरसनयाऽलिह्य चानन्द्य हन्त्रा
शृङ्गाग्रेण प्रबलगवयेनैव साम्यं विधत्ते

76 दैवौर्जित्यं[1] हृदि निदधतो जिह्रतो लोकवादात्
सन्तो दुःसैर्न्यथितमनसः किञ्चिदंहःकृतोऽपि[2]
प्राज्ञैर्भूयः किणितरसनं[3] स्तोत्रपात्रीकृतेभ्यो
नैव न्यूनास्सुचरितपथान्नच्युतेभ्यो महद्भ्यः

77 धर्मो नैवेतरजनगृहिण्यालयद्वारसेवा
धर्मो[4] वा स्यात् सुखलवकरी चेत्तदा सेव्यतां सा
नैवंभूतापितु पुनरसौ देहकंपस्य चित्तो-
त्कंपस्यापि प्रबलकरणं भीतिदः कोपि रोगः

78 स्वीयाचारं परममविनाश्यात्मविद्यामहत्वा
धर्मान् कृच्छ्रश्चिरमुपचितानाशु चाभ्रंशयित्वा
तारुण्याद्यं हितमतितरामप्रलोप्य स्वपत्न्या
भोगः श्रेयान् कुसुमितलतासुन्दराङ्ग्या युवत्या

---

१. दैवस्य=भवितव्यतायाः । और्जित्यं=बलवत्त्वम् ॥
२. दुःखैः=दारिद्र्यप्रयुक्तैः ॥
३. किणितेत्यादि=रसनापि यथा सञ्जातकिणा स्यात् तथा पुनःपुनः स्तुतेभ्य इत्यर्थः ॥
४. धर्मो वा स्यादिति वात्स्यायनमताभिप्रायेणेदम् ॥

79 कामाक्रान्ता न खलु दधते साध्वसं प्राणिघातात्
नो लज्जन्तेऽप्यनृतवचनान्नैव रक्षन्ति मानम्
कुर्युस्तेयं[1] न परमखिलान्यप्यकृत्यानि कुर्युः
कामं कुत्साकलुषवितते: कारणं यन्न विद्युः

80 उद्वीर्यास्यस्थमपि मधुरं[2] वस्तु तिक्तं[3] बुभुक्षोः
कुत्स्यस्योष्ट्रादिकमृगकुलस्योपमां प्राप्नुवन्तः
केचिल्लक्ष्म्या अपि शुभगुणैरुत्तमायां स्वपत्न्यां
सत्यां चान्यास्वभिकमनसः स्वोन्नतिं नाशयन्ति

81 पातिव्रत्यांबरवरधरा प्रेमपुष्पावतंसा
ह्रीपाटीराञ्चिततनुलता शीलसौगुण्यभूषा
पत्नी स्याच्चेत्, यदि च विभवः पुत्रनामाऽपि तस्याः
अस्या भर्तुः किमिव हि तपः स्वेन कर्तव्यमास्ते

82 सौन्दर्यश्रीसुरुचिरतनुर्नूतनतारुण्ययोगः
सम्यग्गायी सकलवनितानेत्रहारिस्वदृष्टिः
भर्ताऽत्यन्तं मधुरमृदुळोक्त्याश्रयोऽप्यस्तु कामं
स्त्रीणां चित्तं लगति पुरुषे भर्तृभिन्ने तथापि

---

१. कुर्युरिति = स्तेयं परं न कुर्युः किन्तु सकलान्यप्यकृत्यानि कुर्युरित्यर्थः ॥
२. मधुरं वस्तु = आम्रपल्लवादि ॥
३. तिक्तं = निम्बपत्रादि ॥

83 नानानृभ्यो निजरतिमुदां विक्रयादेव भुक्तिं
सन्तन्वाना कनकवलयालङ्कृता वारयोषा
भर्तुस्स्वस्य[1] स्वजननिवहस्यापि जारस्य[2] वा नो
हानिं दत्ते तत इयमतीवोत्तमा धर्षिणीभ्यः[3]

84 नैव ध्यायत्युपपतिरता तस्य बान्धव्यभङ्गीं
विन्ते वंशोन्नतिमपि न वा नावति स्वां ह्रियं च
नो जानीते स्वहृदयजयं श्रेय आस्ते किमन्यत्
निष्प्रज्ञाया इह हि जननं पातकायैव तस्याः

85 धूतावद्या विषयजयिनो नोत्तमा मानयन्ति
स्त्रीत्वं, नामाप्यभिदधति नो योषितां, रागगीतीः
नो शृण्वन्ति, स्वहृदयगतं स्याद्यथैवं न पश्य-
न्त्यासां रूपं, न हि च नटनाद्यादियन्ते कदापि

86 निर्मोहत्वात् सुखलवतृषाऽनाहतार्यव्रतस्थाः[4]
निर्दोषस्त्रीमृदुभुजलतालिङ्गसंवेशमुख्यैः
यद्धा सौख्यं, यदपरमतः, तत्र वाञ्छाऽतिभुक्ते-
रेवान्नादेरिति, मितमिहोन्मत्तवद्भुञ्जतेऽन्नम्

---

१. भर्तुः = भर्तृस्थानीयस्य प्रीतिनायकस्य ॥
२. जारस्य = द्रव्यनायकस्य ॥
३. धर्षिणीभ्यः = सत्कुलप्रसूताभ्यो व्यभिचारिणीभ्यः॥
४. सुखलवेति = वैषयिकाल्पसुखाशया अपरिक्षतशीलाः उत्तमपुरुषाः ॥

87 देहेऽन्येषामधिककरुणास्नेहवन्तोऽपिं सन्तः
न त्रायन्ते सुकृशमपि वा विस्फुटास्थि स्वगात्रम्
मोक्षे ज्ञानछदिषि[1] भवने वासमेवेहमानाः
देहं गेहं पललपटलं नश्वरं किन्ववन्ति

88 अत्यल्पाल्पं विषयसुखमप्याश्रितास्सर्वमन्यत्
सौख्यं श्रेयस्तममपि जहत्येव मत्वा तृणाय
ब्रह्मानन्दाम्बुधिजलझरे नित्यसंक्लृप्तलीलाः
भौमानन्दे नरकसदृशे तुच्छके किं पतेयुः

89 सन्यासस्थास्तादितरदुराचारवन्तोऽपि योषित्-
सङ्गं जह्युर्यदि, तदरयोऽप्यञ्जलिं सन्निबध्य
तेषां काष्ठां[3] सपदि विनमन्त्येनमेते न जह्यु-
श्चेच्छ्रेयांसोऽप्यधिकमभिकैरप्यमी स्युर्जुगुप्स्याः

90 नानाकृत्यव्रजमसफलं सम्भ्रमेणैव कृत्वा
घस्रान्[4] रात्रीरपि ननु वृधा यापयन्तो विमूढाः
पुण्ये कृत्ये महति सुजनैः प्रेषिताश्चेत् प्रकामं
कम्पन्ते द्राक् चकितचकिताः, स्वस्ति यांयुः[5] कथं ते

---

१. छदिः = पटलम् ॥
२. तादितर = योषित्सङ्गेतर ॥
३. काष्ठां = दिशम् ॥
४. घस्रान् = दिनानि ॥
५. यायुः = प्राप्नुयुः ॥

0-2665

91 नाशाभावं परममवधिं स्वायुषो वा विबोद्धुं
शक्तिर्नृणां यदि, तदधुना यौवनं वर्तते नः
सोढ्वा कृच्छ्रं जरसि सुतपः प्राचरेमेत्यशङ्कं
निद्राप्यर्हा तप ऋषिगणास्तद्विदोऽप्याचरन् द्राक्

92 नक्तं स्तेनाः पथिककनकग्राहिणः पान्थवर्गं
हित्वा मार्गं विपुलमपथं यापयन्ते यथैवम्
पापानि प्राग्जननरचितानीर्ष्यया प्रेरयेयुः
पापं कर्तुं सुकृतकरणे सज्जमानांश्च जन्तून्

93 चित्ते रक्ता बहिरपि तपोवेषभाजो य एषां
वेषस्सोऽसौ न खलु कवचेनापि सादृश्यमेति
अक्षाण्यन्यान्यवितुमनलंभूष्णुरप्येष सम्यक्
रक्षेदेकां त्वचमपि, न सन्त्रायते तां च वेषः

94 भो भो मर्त्या! मतिविरहिता! व्याजतश्शीलनिष्ठाः!
सर्वेऽस्माभिः कपटचरितैर्वञ्चिता इत्यमन्दम्

---

१. नाशाभावं = नित्यत्वम् ॥ २. जरसि = जरायाम् ॥
३. निद्रेति = तपस्यनादर इति निर्गलितार्थः ॥
४. तद्विदः=स्वस्यानित्यत्वं स्वायुषः परमावधिं वा जानन्तः॥
५. अक्षाणि = इन्द्रियाणि ॥
६. अनलंभूष्णुः = असमर्थः ॥
७. एषः = कवचः ॥

मा मोदध्वं सकलकपटान् सर्वसम्पूर्णरूपो
विद्यात्सर्वेश्वर इति भयाद्वेपनं ज्ञानचिह्नम्
95 दुर्गन्धाढ्ये भृशमपिहितेऽप्यामिषे पूतिगन्धो[1]
दूरं गच्छत्यखिलमनुजघ्राणरन्ध्रार्तिकारी
एवं मङ्क्षु प्रसरति परद्रोहवाणी जनानां
सम्यग्गूढाप्यहह पटहोद्घोषितेवेश्वरेण
96 वस्तु स्वल्पं झटिति न पतेत् भ्रष्टमुच्चैःपदाच्चेत्
संशीर्णं स्यात् पतदपि न वा, नो तथा स्यान्महीयः
जीवन्त्यल्पाः स्वपदगलिता श्चापि रीत्या कया चित्
जीवन्त्यार्याः कथमपि पुनर्नैव तादृग्विधाश्चेत्[2]
97 निन्दां सूते न खलु महतां निन्द्यमप्यत्र कर्म[3]
द्रागेवैतां[4] जनयति तदेवाल्पकानां[5] जनानाम्
गोमेधेनानलमभिसमर्च्यादधानैः प्रवृष्टिं
विप्रैस्तुल्याः किमु पलभुजो देहपुष्टयै कदर्याः
98 ईशस्सर्वेष्वपि समतयान्तर्बहिर्वर्तमानः
त्यक्तासङ्गो भवति च यथा योगिनस्तद्वदेव

---

१. आपिहिते = आच्छादिते ॥
२. तादृग्विधाश्चेत् = स्वपदगलिताश्चेत् ॥
३. निन्द्यमपीति = निन्द्यमपि पशुविशसनादिकं कर्म यागीयं सत् महतां निन्दां न ददातीत्यर्थः ॥
४. एतां = निन्दाम् ॥
५. तदेव = पशुविशसनादिनिन्द्यकर्मैव ॥


तेषान्तेषां भृशमनुगुणाश्चित्तपाकानुगुण्यात्
सञ्जल्पन्तो हितकरगिरः काप्यसक्ता भवन्ति
99 सन्मार्गज्ञास्सदमलपरब्रह्मविज्ञानलाभै-
काग्रस्वान्ता अनृतविषयेष्विन्द्रियाण्यप्रवर्त्य
दान्तिद्वारस्थितिमति दुराचारलज्जाकवाटे
सन्तोषाख्यार्गळकलनया सन्नियच्छन्ति यत्नैः
100 विद्यापत्न्या समुपजनितो ग्रन्थरूपो हि पुत्रः
पुत्रश्शास्त्रप्रवचनपटोस्सूरिभर्तुः प्रियत्वात्
सर्वत्यागप्रविशदहृदां तत्वबोधात्प्रफुल्लो
मोदो मोदस्तादितरसुखं नश्वरं दुःखमेव
101 ज्ञात्वा शास्त्रं विनयविमदः कर्म हित्वा निषिद्धं
कृत्वासम्यग्विहितमपि संशोध्य चित्तं विवेकात्
मुक्तिप्राप्त्योपायिकपदवीं साधयित्वा यथार्थ-
ज्ञानं प्राप्तः कृतिषु विमुखो ब्रह्मनिष्ठः परिव्राट्

---

१. अनृतेषु = असत्येषु ॥ विषयेषु= शब्दादिषु ॥
२. सन्तोषः = दैवायत्तेन भोगेन तृप्तत्वम् ॥
३. ज्ञात्वा = अभ्यस्य ॥
४. विनयेन विमदः = विद्वत्तानिबन्धनगर्वरहितः
५. विवेकात् = नित्यानित्यवस्तुविवेचनात् ॥
६. मुक्तीति = मुक्तिप्राप्त्युपायभूतां ब्रह्मविचारणरूपां पदवीम् ॥ ७. कृतिषु = प्रापञ्चिकव्यवहारेषु ॥
८. ब्रह्मनिष्ठ इति = ब्रह्मणि नितरां सदातनी स्थितिः यस्य तादृश एव, परित्यज्य सर्वं व्रजति प्राप्नोति ब्रह्मेति परिव्राट्शब्दवाच्यस्सन्न्यासीत्यर्थः ॥

102 ज्ञात्वात्मानं श्रुतिफणितिभिश्चान्यथाज्ञानशङ्का-
हीनं निर्णीय च सुमननैरुन्मिषत्तत्त्वदृष्टौ[1]
सुप्तौ[2] साक्षाद्यतिभिरिह यद्दृश्यते दर्शनीयं
जागृद्धस्तूभवनमपि चेत्तस्य तत्[3] पूरुषार्थः

—*॥ नीतिमार्गप्रदीपिका संपूर्णा ॥*—



---

१. उन्मिषदिति = उन्मिषन्ती उन्मीलन्ती तत्त्वदृष्टिः ब्रह्मस्फूर्तिरेव दृष्टिः नेत्रं यस्यामिति लौकिकसुप्तेर्व्यतिरेको दर्शितः ॥

२. सुप्ताविति = सुप्तौ समाधिरूपायाम् । दर्शनीयं यत् ब्रह्म यतिभिः साक्षात् दृश्यते तस्य ब्रह्मणः जागृद्धस्तूभवनं जागृदशानुभाव्यमानत्वमपि भवति चेत् ॥ समाधिरूपायां सुप्तौ स्वाप्निकवस्तुवत् ब्रह्मणो भानं, प्रपञ्चव्यवहाररूपायां जागृति तु प्रपञ्चभानं, इति भेदमन्तरेणैव समाधाविव व्यवहारकालेऽपि ब्रह्मभानमेव भवति चेदिति भावः ॥

३. तत्पूरुषार्थः = तदेव पुरुषार्थ इत्यर्थः ॥